PAPER - 5

# MT

**2017 .... .... 1200**

**Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II PAPER - V**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

लेरसिया रूपं परिवर्तितवान् यतः ..............

(तस्मै पुरातनवेशभूषा न अरोचत । / सः जनानां सहृदयतां द्रष्टुमैच्छत् ।)

II) पूर्णवाक्येन उत्तरत । १

लेरसिया कैः सह ग्रामं गतः ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

लेरसियामहोदयं स्वगृहं नेतुं सर्वे ग्रामवासिनः मनसि अकुर्वन् ।

पुरा यदा मिझोजनाः गणान् कृत्वा वसन्तः तदा तेषामेकस्य गणस्य प्रमुख आसीत् लेरसियानामा । अतीव दयालुः स गणप्रमुखः सर्वैः सह समभावेन आचरति स्म । धनवत्तां दारिद्र्यं वागणयित्वा स जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म । कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कंचन ग्रामं गतः । तत्पूर्वं कदापि स तत्र न गतवान् । ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् । कस्याश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत । तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत। तदनु स सहकारिभिः सह तद् ग्रामं प्रविश्य मध्यचतुष्पथं यातः। तत्र ते सर्वे मार्गे समुपाविशन् । तत्रस्था ग्रामवासिन एतावदेव जानन्ति यदागता जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते परं न कोऽपि जानाति स्म तेषु कतमः लेरसिया इति । लेरसियासहिता येऽन्ये जना आसन् ते ग्रामवासिभिर्जनैः स्वगृहं भोजनार्थमाहूताः । बहुना आतिथ्येन नृत्यगीतवादनैश्च सत्कृताः । परं लेरसिया न केनापि समाहूतः यतोऽतीव जुगुप्साकरमभद्रं च तस्य दर्शनम् । तेन न कोऽपि तं स्वगृहं नेतुं मनस्यकरोत् ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) योग्यं पर्यायं चिनुत १

१) ग्रामवासिभिर्जनैः - ......... + जनैः । (ग्रामवासिभिर् / ग्रामवासिभिः)

२) यतोऽतीव - यतः + ......... । (अतीव / तीव)

II) चतुर्थपदं लिखत । १

१) काया : शरीरम् :: रोगी : ............ ।

२) विषमभावेन : समभावेन :: अनन्तरम् : ............ ।

III) विशेषण-विशेष्य-अन्वितिः । १

............ , ............ दर्शनम् ।

IV) गद्यांशात् चित्वा द्वे पूर्वकालवाचक धातुसाधित - अव्यये लिखत । १

**३. स्वमतप्रकटनम् ।** २

सद्यःकाले आत्मिकी सम्पद् आवश्यकी अस्ति वा न इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

सोमशर्मा चकितः अभवत् यतः ...........

(तस्य उपचाराः प्रारब्धाः इति सः न जानाति । / अनन्तभट्टेन तस्मै महार्घाः उपचाराः दत्ताः।)

II) कः कं वदति । १

सप्तमवैद्यस्य आवश्यकता न स्यात् एतदर्थे अहं यथाशक्ति प्रयतिष्ये ।

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

सोमशर्मा प्रसन्नमनसा स्वगृहं न्यवर्तत ।

सुहास्यवदनः अनन्तभट्टोऽवदत्, ''भवत उपचाराः प्रारब्धा एव । मम षड्भिः सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम् ।'' एतन्निशम्य चकितचकितः सोमशर्मा अपृच्छत्,''षड् वैद्याः?'' अनन्तभट्टः प्रत्युवाच - ''सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, विश्रामश्चेति। एतेभ्यो महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते । भवत्सदृशा विविधकार्यव्यग्रा जना एतेषु षट्सु वैद्येषु नावधानं ददतीति जानाम्यहम् । अत एव भवान् प्रभाते पद्भ्यामागच्छतु इति मया कथितम् । भवन्तमहं शीतलजले स्नातुं सात्त्विकभोजनं भोक्तुं च प्रेरितवान् । एते सर्वेऽनुभवाः आनन्ददायका इति भवता सूचितमेव । भवानेतान् षड्वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु । एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति किम्? इतोऽपि यदि भवानधिकं साहाय्यमपेक्षते तर्हि सप्तमो वैद्योऽहं सहकार्यार्थं सदैव सिद्धोऽस्मीति''। बद्धाञ्जलिः सोमशर्मा सादरमनन्तभट्टाय अकथयत्,''सप्तमस्य वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये ।'' ततो वैद्यराजाय धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) ददतीति = ....... + इति । २) भवानेतान् = भवान् + ....... ।

II) समूहेतरपदं लिखत । १

१) श्रुत्वा, आकर्ण्य, दत्वा । - ......... २) गृह्णाति, यच्छति, ददाति । - .........

III) विशेषण-विशेष्य-अन्वितिः । १

......... , ........ सोमशर्मा ।

IV) गद्यांशे आगते द्वे हेत्वर्थक धातुसाधित-अव्यये चित्वा लिखत । १

**३. पृथक्करणम् ।** २

**यथाक्रमं घटनां लिखत ।**

i) सोमशर्मा चकितः अभवत् ।

ii) सोमशर्मा बद्धाञ्जलिः अभवत् ।

iii) सोमशर्मा स्वगृहं न्यवर्तत ।

iv) सोमशर्मा सादरम् अनन्तभट्टाय अथयत् ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

वयम् अपारम्परिकान् ऊर्जास्रोतांसि स्वीकुर्मः यतः ...........

(अपारम्परिकाणि ऊर्जास्रोतांसि महत्त्वपूर्णानि । / तेषां उपयोजनेन धनसञ्चयः, राष्ट्रविकासः च भवेत् ।)

II) पूर्णवाक्येन उत्तरं लिखत । पवनोर्जा कीदृशी ? १

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

अणुभ्यः शक्तिः लभ्यते ।

श्रेया - निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति ।

पार्थः - सूर्यः, पवनः, जलमित्येतानि महाभूतानि । एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि । गोमयात्, पर्णावशेषाद् अवकराच्च जैविकवायुः प्रभवति तथा एरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते । अणुभ्योऽपि ऊर्जा लभ्यते ।

श्रेया - तथापि एतेषु सौरं स्रोतः अपरिमितम्, अक्षयं, प्रदूषणमुक्तं च । कोराडी इत्यत्र औष्णिक्याः ऊर्जायाः प्रकल्पः तथा ट्रॉम्बेतारापुरस्थौ द्वौ अणुविद्युत्-प्रकल्पौ प्रसिद्धौ । कोयना-जल-विद्युत्प्रकल्पस्तु अर्वाचीनमहाराष्ट्रस्य भाग्यरेषैव ।

पार्थः - कुत्रचित् पर्वतेषु पवनचक्रिकाः स्थाप्यन्ते । मरुतः साहाय्येन विद्युन्निर्मीयते । अपि सैव पवनोर्जा ?

श्रेया - सत्यम्, सा पवनोर्जा प्रदूषणमुक्ता, सुरक्षिता, उपजीविकासाधिका च ।

अथर्वः - एवमपारम्परिकान् उपायान् स्वीकृत्य पारम्परिकस्रोतसां परिरक्षणं च कर्तव्यं सर्वैः। येन धनसञ्चयो भवेत्, तेनैव राष्ट्रोन्नतिः स्यात् ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) सैव - ........... + एव । (सः / सा)

२) इत्यत्र - इति + ........... । (अत्र / यत्र)

II) समूहेतरपदं लिखत । १

१) मरुत्, सरित्, पवनः, वायुः । - ..........

२) पुरातना, नूतना, प्राचीना, जीर्णा । - ..........

III) विशेषण-विशेष्य-अन्वितिः । १

......... , ........ अणुविद्युत्प्रकल्पौ ।

IV) गद्यांशात् चित्वा के अपि द्वे धातुसाधित-अव्यये लिखत । १

३. **पृथक्करणम् । जालचित्रं पूरयत ।** २




**द्वितीयः विभागः - पद्यम् ।**

प्र.२. **अ) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २

**जालचित्रं पूरयत ।**




त्यागसुरक्तः कृषिभिर्हरितः वैज्ञानिकयशसा च श्वेतः ।
त्रयोऽपि वर्णाः प्रदत्ताश्च यैर्ध्वजाय चास्माकम्
जयतु जवानो, जयतु किसानो, जयतु च विज्ञानम् ।
नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम्
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ।।

२. **स्पष्टीकरणम् ।** २

'नमामि राष्ट्रध्वजम्' इति काव्याधारेण त्रिवर्णानां विषये कः विचारः कृतः इति स्पष्टीकुरुत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) समूहेतरपदं लिखत । १

१) द्विजः, पक्षी, ब्राह्मणः ।

२) विस्मितः, चकितः, लज्जितः ।

II) तपोदत्तस्य के अपि द्वे विशेषणे पद्यांशेभ्यः चित्वा लिखत । १

आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विजः ।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे ।।१।।
अनन्तरं गर्ह्यमाणः सर्वैरनुशयान्वितः ।
स विद्यासिद्धये तप्तुं तपो गङ्गातटं ययौ ।।२।।
तत्राश्रितोग्रतपसस्तस्य तं वीक्ष्य विस्मितः ।
वारयिष्यन् द्विजच्छद्मा शक्रो निकटमाययौ ।।३।।

२. **अन्वयपूर्तिः ।** २

तत्र ....... तस्य तं वीक्ष्य ....... शक्रः तं ....... द्विजच्छद्मा तस्य निकटम् .......।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) रक्ष ..............भवद्गुणाः ।।

ii) सदा ..............सुकृतिनः ।।

iii) नृपाणां च ..............पराक्रमः ।।

**ड) वृत्तनाम चिनुत ।** १

अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।

(उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

## तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

अण्डजानां प्रवरः सुमेरुः अस्ति ।

II) एकपदेन उत्तरं लिखत । १

चित्रस्य शोभा कैः वर्धते ?

‘विष्णुधर्मोत्तरपुराणम्’ इति अस्मिन् ग्रन्थे चित्रकलाशास्त्रं विस्तरेण वर्णितं विद्यते । ‘मार्कण्डेय-वज्रसंवादः’ तत्र प्रख्यातः । वज्रमहाराजेन, ‘‘लोके-परलोके सुखसाधनं किम् इति’ पृष्टे सति मार्कण्डेयमुनिः चित्रकलायाः श्रेष्ठत्वम् इत्थं उक्तवान्-

यथा सुमेरुः प्रवरो नगानां यथाण्डजानां गरुडः प्रधानः ।
यथा नराणां प्रवरः क्षितीशः तथा कलानामिह चित्रकल्पः ।।

कलया न केवलं कलावताम् अपि तु सामान्यजनानाम् अपि सुखप्राप्तिः भवति ।

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।
माङ्गल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम् ।।

अस्याः चित्रकलायाः प्रवर्तकः आसीद् धर्मसुतः नारायणः यः देवानां शिल्पी । सामान्येन चित्ररेखाः, आकारः, प्रकाशश्छाया च प्राधान्यं वहन्ति । चित्रे सादृश्यकरणं प्रधानं परिकीर्तितम्। स्थानं, प्रमाणं, मधुरत्वं, भूलम्भः, विभक्तता, सादृश्यं, क्षयः तथैव वृद्धिरित्येते अष्टगुणाः चित्रे अनुस्यूताः भवेयुः । तैः चित्रस्य सौन्दर्यं वर्धते । चित्रकलायां वर्णविन्यासे एवं चित्रकारस्य परीक्षा भवति नैपुण्यमपि च आविष्कृतं भवति । श्वेतः, रक्तः, पीतः, कृष्णः, हरितश्चैते पञ्च प्रधानवर्णाः विदिताः। द्वित्राणां सम्मिश्रणेन अवान्तरवर्णानां संख्या अगणिता वर्तते । परं सम्मिश्रणार्थं श्यामगौरवर्णौ अतीव महत्त्वपूर्णौ । रङ्गव्यतिकरैः चित्रस्य शोभा वर्धते। परमस्मिन् विषये चित्रकारस्य कल्पकता एव आवश्यकी ।

२. **पृथक्करणम् ।** २




**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

अ) **कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

आसीत् अङ्गुलिमालः नाम कश्चित् कुख्यातः चोरः । ....... अरण्ये स निवसति स्म । पथिकान् लुण्ठयित्वा तेषां अङ्गुलीश्च कर्तयति स्म । तासां मालां कृत्वा कण्ठे धृता तेन तस्मात् तस्य नाम अङ्गुलिमालः इति । ....... सहस्रं धारयिष्यामि इति तेन प्रतिज्ञा कृता। कथमपि स ग्रहीतव्यः एतदर्थे राजा प्रयत्नशीलः आसीत् । राज्ञः एते प्रयासाः ....... निवेदयितुं तस्य माता अरण्यम् आगच्छत् । प्रतिज्ञापूर्तये ....... अङ्गुलेः आवश्यकता आसीत् । तदर्थं स मातरमेव अङ्गुलिकर्तनार्थम् अतर्जयत् । यावदेवासौ अङ्गुलिं कर्तयति तावत् प्राप्तस्तत्र भगवान् बुद्धः । स भगवान् अङ्गुलिमालं एकं ....... अयाचत ।

(वृक्षस्य, अङ्गुलीनां, एकस्याः, पर्णम्, पुत्राय)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. ग्रीष्मवर्णनम् । २. सङ्गणकः । ३. गणेशोत्सवः।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) On 5th sep. teacher's day is celebrated.

ii) A cat likes milk.

iii) Peacock-feather looks beautiful on the head of Lord Krishna.

iv) Clouds rain.

v) Rainbow is seen in the sky in monsoon.

vi) The main job of the news reporter is to collect the news.

vii) When will you go to a village?

viii) Tell the story of cunning jackal.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) धातु स्पृह् (१० उ.प.) २) धातु वि + तॄ (१ प.प.)

३) धातु अनु + सृ (१ प.प.) ४) धातु वि + रम् (१ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) समुद्रस्य निकषा मम गृहं वर्तते । २) शङ्करस्य साकं पार्वती तिष्ठति ।

३) प्रकाशस्य विना कार्यं न शक्यम् । ४) पर्वतं समीपं वृक्षाः सन्ति ।

## पञ्चमः विभागः - व्याकरणम् ।

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः | परोक्षः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| वद् (१ प.प.) | वदिष्यति | ....... | ....... | वदति | ....... | वदेत् |
| दा (३ प.प.) | ....... | अददात् | ददौ | ....... | ददातु | ........ |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| द्वितीया | ...... | भगवन्तौ | ...... |
| चतुर्थी | ...... | ...... | शशिभ्यः |
| षष्ठी | मम | ...... | ...... |
| तृतीया | ..... | आभ्याम् | ....... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

( करणीयः, विहरन्तः, पठितः, लिखितवत्, स्मृतवती, विद्यमानम्, गम्यः, आनीता )

**ड) समासाः ।**

**मेलनं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | **समासविग्रहः** | **समासनामानि** |
|---|---|---|
| i) | चिरं जीवति इति । | अव्ययीभाव समास |
| ii) | प्रदर्शनाय इदम । | उपपद तत्पुरुष समास |
| iii) | द्विजस्य आकृतिः यस्य सः । | प्रादि बहुव्रीहि समास |
| iv) | आत्मनः परिचयः । | कर्मधारय समास |
| v) | नाट्यविषयकं शास्त्रम् । | षष्ठी तत्पुरुष समास |
| vi) | निर्गतानि अक्षराणि यस्मात् सः । | मध्यमपदलोपी कर्मधारय समास |
| vii) | व्रतं च उपवासः च एतयोः समाहारः । | प्रादि तत्पुरुष समास |
| viii) | विशेषेण सह । | समाहार द्वन्द्व समास |
| | | बहुव्रीहि समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) भगवता तस्मै नूतनचीवराणि दत्तानि । (प्रयोगं परिवर्तयत।)

ii) मेघः सन्देशम् अनयत् । (यक्षः) (प्रयोजकरचनां योजयत ।)

iii) अध्यापके कक्षाम् आगते छात्राः स्तब्धाः अभवन् । (सतिसप्तमीरचनां निष्कासयत ।)

iv) भवान् कृपया तपोमार्गम् आदिशतु । ('भवान्' इति स्थाने 'त्वम्' योजयत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) बिल्वदले ....... पत्राणि सन्ति । (३)

ii) अस्याम् आवल्यां ....... मञ्चः त्रुटितः । ($2^{nd}$)

iii) अस्माभिः दिनस्य ....... दन्तधावनं करणीयम् । (twice)

iv) पेट्रानगरी इति ....... आश्चर्यम् । ($7^{th}$)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

नैकदा व्यवहारे अहं वञ्चितोऽस्मि इति मनुजः स्वयं जानाति । तदा अहं मूर्खोऽस्मीति स वदति। किन्तु यदि अन्यः कोऽपि तं मूर्खमिति सम्बोधयति तदा सः क्रुद्धः भवति । मनुजः जानीयात् यदि क्रुध्यामि तर्हि अहमेव मम शत्रुः । यदि अहं स्निह्यामि तर्हि अहमेव मम मित्रम्। कल्पनयैव वयमन्यान् जनान् अमित्रम् अथवा मित्रं मन्यामहे। यो मम अहंकार पुष्यति स मम सखा । यो मम अहंकारं दुनोति स मम वैरी । संक्षेपतः मम मनः एव मम शत्रुः अथवा मम मित्रम् ।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

चेतो भग्नं यदि किल भवेत्सज्जनानां कदाचित्
निःसन्देहं सहजमचिराद्धेमवद्युज्यते तत् ।
छिन्नो भिन्नो घटति न यथा कुम्भकारस्य कुम्भः
दुर्वृत्तानामुपहतमनो युज्यते नैव नैव ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

(अनन्यमानसं विचिन्तयन्तं निजसुपुत्रमवधार्य महिषी चन्द्रमतिः पृच्छति।)

चन्द्रमतिः – वत्स चिरं जीव । केन कारणेन म्लानमुखः सचिन्तः दृश्यसे ?

यशोधरः – (स्वागतम्) कथमिदानीं हृदशल्यं निवेदयामि। निवेदयेयम् । भवतु (प्रकाशम्) अम्ब प्राप्तायामुषसि स्वप्नमेकमपश्यम् ।

चन्द्रमतिः – तेन हि सत्वरं कथय ।

यशोधरः – श्रुणोतु कश्चन निशाचरः मम वक्षोदेशे निषण्णः । स आह राज्यभारं पुत्रे निधाय यतिर्भूत्वा तपोवनमाश्रय इति ।

**Best of Luck**